**केन्द्रीय विद्यालय संगठन, कोलकाता संभाग**

KENDRIYA VIDYALAYA SANGATHAN, KOLAKATA REGION

**अर्ध वार्षिक परीक्षा / HALY YEARLY EXAMINATION, 2026-27**

कक्षा/ CLASS :**VIII** समय/ Time: **02:30 होराः / Hours**

विषय/ SUBJECT :**संस्कृतम् / SANSKRIT** अधिकतम अंक/ Max. Marks: **60**

**निर्देशाः-**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
2. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
3. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
4. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारं एव लेखनीयः ।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम् -**

(क) भागः : अपठितावबोधनम् 10 अङ्काः

(ख) भागः : रचनात्मककार्यम् 15 अङ्काः

(ग) भागः : अनुप्रयुक्तव्याकरणम् 25 अड्काः

(घ) भागः : पठितावबोधनम् 30 अङ्काः

**'क' खण्ड : अपठित-अवबोधनम् 10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नान् उत्तरत -**

एकस्मिन् ग्रामे रामः नाम कृषकः वसति स्म। सः प्रतिदिनं प्रातः एव उत्थाय स्वक्षेत्रं गच्छति स्म। सः स्वकार्ये सदा तत्परः आसीत्, कदापि आलस्यं न करोति स्म। एकदा अनावृष्ट्या सर्वे कृषकाः चिन्तिताः अभवन्, परन्तु रामः निराशः न अभवत्। सः कूपात् जलम् आनीय स्वक्षेत्रं सिञ्चति स्म। तस्य परिश्रमेण तस्य क्षेत्रे उत्तमं धान्यम् अजायत्। सर्वे ग्रामवासिनः तं प्रशंसन्ति स्म। रामः सर्वान् उपदिशति स्म – "परिश्रमः एव सफलतायाः मूलम् अस्ति।"

**प्रश्नाः**

**I. एकपदेन उत्तरत -** **1x2=2**

(i) कृषकस्य नाम किम् आसीत्? (ii) रामः जलं कुतः आनयति स्म?

**II. पूर्णवाक्येन उत्तरत -** **2x2=4**

**(i)** रामः प्रतिदिनं किं करोति स्म? **(ii)** रामः सर्वान् किम् उपदिशति स्म?

**III. भाषिक कार्यम् (उचितं विकल्पं चित्वा लिखत) -** **1x4=4**

**(i)** 'कृषकः' इति पदस्य लिङ्गं किम् अस्ति?

(क) स्त्रीलिङ्गम् (ख) पुल्लिङ्गम् (ग) नपुंसकलिङ्गम् (घ) उभयलिङ्गम्

**(ii)** "एकदा अनावृष्ट्या सर्वे कृषकाः चिन्तिताः अभवन्" अत्र कर्तृपदं किम् ?

(क) चिन्तिताः (ख) एकदा (ग) अभवन् (घ) कृषकाः

**(iii)** 'परिश्रमः' इत्यस्य विपरीतार्थकं पदं किम्?

(क) आलस्यम् (ख) सफलता (ग) कृषकः (घ) जलम्

**(iv)** "तस्य परिश्रमेण तस्य क्षेत्रे उत्तमं धान्यम् अजायत्" अत्र क्रिया का ?

(क) तस्य (ख) उत्तमं (ग) धान्यम् (घ) अजायत्

**'ख' खण्ड : रचनात्मककार्यम् 10 अङ्काः**

**2. चित्रम् अवलोक्य मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत।** **(5)**

| |
|---|
| **मञ्जूषा – भोजनम्, गृहम्, पठति, माता, क्रीडति** |



**(i)** चित्रे एकं ______ दृश्यते। **(ii)** ______ पाकं करोति। **(iii)** बालकः पुस्तकं ______।

**(iv)** बालिका उद्याने ______। **(v)** सर्वे सायंकाले मिलित्वा ______ कुर्वन्ति।

**3. प्रदत्तानां पदानां प्रयोगेण वाक्यानि रचयत-** **(5)**

**(i)** विद्यालयः **(ii)** क्रीडा **(iii)** गुरुः **(iv)** पुस्तकम् **(v)** छात्राः

**'ग' खण्ड : अनुप्रयुक्तव्याकरणम् 20 अङ्काः**

**4. निम्नलिखितपदानां सन्धि-विच्छेदं कुरुत -** **(5)**

**(i)** नम्रास्तरवः **(ii)** अधिकाधिकम् **(iii)** चैव

**(iv)** देशभक्तोऽयम् **(v)** बुभुक्षितोऽस्मि

**5. अधोलिखितानि वाक्यानि पठित्वा ल्यप्-प्रत्ययान्तेषु परिवर्तयत –** **(5)**

**यथा -** छात्रः कक्षां प्रविशति । संस्कृतं पठति । छात्रः कक्षां **<u>प्रविश्य</u>** संस्कृतं पठति ।

**(i)** भक्तः मन्दिरम् आगच्छति। पूजां करोति ।

**(ii)** माता भोजनं निर्माति । पुत्राय ददाति ।

**(iii)** सुरेशः प्रातः उत्तिष्ठति। देवं नमति ।

**(iv)** रमा पुस्तकं स्वीकरोति। विद्यालयं गच्छति।

**(v)** तण्डुलकणान् विकिरति। जालं विस्तारयति।

**6. समासयुक्तपदेन रिक्तस्थानं पूरयत –** **(5)**

**(i)** गण्डक्याः तीरम् ______ **(ii)** तण्डुलानां कणाः ______ **(iii)** जालस्य अपहारकाः ______

**(iv)** अवपाताद् भयम् ______ **(v)** कापुरुषाणां लक्षणम् ______

**7. उदाहरणानुसारेण लट्-लकारस्य वाक्यानि लोट्-लकारेण परिवर्तयत–** **(5)**

**यथा- बालिकाः नृत्यन्ति। बालिकाः <u>नृत्यन्तु।</u>**

**(i)** बालकाः हसन्ति।

**(ii)** युवां तत्र गच्छथः।

**(iii)** यूयं धावथ।

**(iv)** आवां लिखावः।

**(v)** वयं पठामः

## 'घ' खण्डः पठित अवबोधनम् 20 अङ्काः

**8. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** **(5)**

अस्ति गोदावरीतीरे एको विशालः शाल्मलीतरुः । तत्र प्रतिदिनं दूरदेशात् पक्षिणः आगत्य निवसन्ति स्म। अथ कदाचित् तत्र कश्चिद् व्याधस्तण्डुलकणान् विकीर्य जालं विस्तीर्य च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारः आकाशमार्गे गच्छति स्म। केचन कपोताः वनमध्ये तण्डुलकणान अवलोक्य लोभाकष्टाः अभवन ततो चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् अवदत् - "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः तद् निरूप्यताम्। कश्चिद् व्याधोऽत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।" एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् अवदत् - "आः किमर्थम् एवमुच्यते ?

**I. एकपदेन उत्तरत-** **½x2=1**

क) गोदावरीतीरे किम् आसीत्?

ख) सपरिवारः आकाशमार्गे कः गच्छति स्म?

**II. पूर्णवाक्येन उत्तरत-** **1x2=2**

क) चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् किम् अवदत्?

ख) चित्रग्रीवस्य वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् किम् अवदत्?

**III. निर्देशानुसारम् उत्तरत-** **1x2=2**

क) चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् अवदत् - अत्र कर्तृपदं किम् ?

ख) कश्चिद् व्याधोऽत्र भवेत् - अत्र क्रिया का ?

**9. पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** **(5)**

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

**I. एकपदेन उत्तरत-** **½x2=1**

(क) क्रोधात् किं भवति? (ख) बुद्धिनाशात् किं भवति?

**II. पूर्णवाक्येन उत्तरत-** **1x2=2**

(क) कीदृशः जनः स्थितधीः उच्यते? (ख) बुद्धिनाशो कस्मात् भवति?

**III. निर्देशानुसारम् उत्तरत-** **1x2=2**

(क) “सम्मोहः” इति पदस्य कृते क्रिया का? (ख) “उच्यते” इति पदस्य कृते कर्तृपदं किम्?

**10. रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत –** **(3)**

(i) **<u>देवाः</u>** भागम् उपासते।

**(ii)** वयम् **<u>ईश्वरं</u>** नमामः।

(iii) **<u>गोपबन्धुः</u>** उत्कलमणिः इति उपाधिना सम्मानितः।

**11. समुचितं विकल्पं चित्वा लिखत –** **(2)**

**(i)** गोपबन्धुदासः केन उपाधिना सम्मानितः?

(क) भारतरत्नम् (ख) उत्कलमणिः (ग) राष्ट्रपिता (घ) देशबन्धुः

**(ii)** गीतायाः उपदेष्टा कः?

(क) वेदव्यासः (ख) भीष्मः (ग) श्रीकृष्णः (घ) अर्जुनः

**12. निम्नलिखितानि वाक्यानि घटनाक्रमेण पुनः लिखत –** **(5)**

(क) भिक्षुकश्च तद्धद्योजितवान्।

(ख) प्रफुल्लचन्द्ररायः गोपबन्धुम् उत्कलमणिः इति उपाधिना सम्मानितवान्।

(ग) गोपबन्धुः अश्रुपूर्णनयनोऽभवत्।

(घ) अतिथयो हस्तपादं क्षालयित्वा आसनेषु उपविष्टवन्तः।

(ङ) दिनत्रयात् किमपि न न भुक्तम्।

*****